# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : त्रिप्रभृतिषु शाकटायनस्य इत्यस्मात् तस्य लोपः इति यावत्

पाठ्यांशसंख्या : 2

पाठ्यांशस्य मुख्याः अंशाः :

1) त्रिप्रभृतिषु शाकटायनस्य।
2) सर्वत्र शाकल्यस्य।
3) दीर्घादाचार्याणाम्।
4) अदर्शनं लोपः - सूत्रार्थः, अर्थस्य लोपसंज्ञा।
5) हलो यमां यमि लोप इति सूत्रम्।
6) तस्य लोपः।

e-Pathshala पाठशाला
A Gateway to all Post Graduate Courses

विषयसूची

1.0 : त्रिप्रभृतिषु शाकटायनस्य
2.0 : अदर्शनं लोपः
2.1 : सूत्रोल्लेखसङ्गतिः
2.2 : सूत्रार्थः
2.3 : सूत्रार्थे प्रसक्तस्येति पदमधिकृत्य विचारः
2.4 : अर्थस्य वा शब्दस्य वा लोप इति संज्ञा
3.0 : हलो यमां यमि लोप इति सूत्रम्
4.0 : तस्य लोपः

## 1.0 त्रिप्रभृतिषु शाकटायनस्य

**उपोद्घातः**

अचो रहाभ्यां द्वे, अनचि च - इति द्वाभ्यां सूत्राभ्यां यरो द्वित्वं विहितम्। तथा हि-

1) अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वित्वम्
2) अचः परस्य यरो द्वित्वम् - इति।

तत्र अनचि च इत्यनेन -

1) अचः परस्य यरो द्वित्वं न स्यात् अचि परे -इति निषेधोपि वाक्यभेदेन कथ्यत इति पठितमस्माभिः।
2) नादिन्याक्रोशे पुत्रस्य इत्यनेन पुत्रशब्दविषये अनचि च इत्यनेन प्राप्तस्य द्वित्वस्य निषेध उच्यते।
3) शरोऽचि - इति सूत्रेणापि अचः परस्य यरः शरि परे द्वित्वं न स्यादिति निषेधः क्रियते।

तत्र उत्तरेषु 1. त्रिप्रभृतिषु शाकटायनस्य 2. सर्वत्र शाकल्यस्य 3. दीर्घादाचार्याणाम् -इति त्रिषु सूत्रेषु द्वित्वविधेः विकल्पः, द्वित्वनिषेधस्य विकल्पो वा क्रियते भगवता पाणिनिना। विकल्पे वा विकल्पनिषेधे वा यरो द्वित्वविषये रूपद्वयसिद्धिः फलति। विकल्पसम्पादकसूत्रत्रयसत्वात् अनचि च इत्यत्र वाग्रहणं नानुवर्तत इति निष्कर्षः।

### 1. त्रिप्रभृतिषु इत्यस्य कौमुद्यामुक्तं व्याख्यानम्

त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम्। इन्न्द्रः इन्द्रः राष्ट्ट्रं राष्ट्रम् -इति कौमुद्यां नपदानुवर्तनं विना सूत्रं व्याख्यातम्।

**शेखरस्थं व्याख्यानम् -**

यदि नपदं नानुवर्तेत तर्हि द्वित्वविकल्पविधायकमिदं पर्यवस्यति। विकल्पेन विधीयते - विकल्पेन निषिध्यते - इत्यनयोः फले भेदोस्ति। कथम्। यस्मिन् वर्णसमुदाये अवरतः त्रयः वर्णाः सन्ति तत्र द्वित्वं वा स्यात्।

इ (न् द् र्) अः। रा (ष् ट् र्) अम्।

हर्यनुभव इत्यादौ ह् अ र् य् अनुभव इत्येवं वर्णेषु विद्यमानेषु (अ र् य् ) - इति न तादृशसमुदायः। तितउ अत्र - तित् (अ उ अ) त्र - इत्येवं यः अचां समुदायः तादृशोपि न गृह्यते। तदुच्यते शेखरे - त्रिप्रभृतिष्विति सूत्रे वर्णानां सजातीयानामेव ग्रहणम्, परस्परसाहचर्यात् - इति।

**2. परस्परसाहचर्यादित्यस्य विशदीकरणम्**

व्यञ्जनव्यवधानं सन्धिकृतविकारं वा विना अचः पौर्वापर्येण भवितुं नार्हन्ति। यद्यपि तितउ इत्येवं द्वावचौ तथा भवेतां तथापि द्व्यधिकास्तु अचः पार्थक्येन सन्धिं विना न तिष्ठन्त्येव। तस्माद् अचोः अचां वा साहचर्यं वक्तुं न शक्यते। हलोः हलां वा साहचर्यं भवितुमर्हति। तस्मादिह त्रिप्रभृतयो वर्णा नाम हल एव।

त्रिप्रभृतिषु वर्णेषु द्वित्वं वा स्यात् -इत्युच्यते। कस्य द्वित्वं वा स्यात्। अचः परस्य वर्णस्य। अचः परः अच् प्रायो न भवति। भवति चेदपि न दोषः, कुतः। कस्य द्वित्वमुच्यते - यरः। अचः परस्य यरो द्वित्वमुच्यते, न तु अचः परस्य अचः।

यदि अच इति नानुवर्तते तर्हि? - त्रिप्रभृतिषु वर्णेषु द्वित्वं वा स्यात् - इत्युच्यते। कस्य द्वित्वं वा स्यात्। यरः। यदि त्रिप्रभृतिषु वर्णेषु मध्ये प्रथमस्य वा द्वितीयस्य वा तृतीयादेर्वा यस्यकस्यचिदपि यरः द्वित्वं विकल्प्येत तर्हि अचो रहाभ्यां

द्वे इति विधानं व्यर्थम्। कथम्। ह् (अ र् य्) अनुभव इत्यादौ यकारस्य त्रिप्रभृतिसमुदायावयवत्वादेव सिध्यति द्वित्वम्।

किञ्च तथासति - इ(न् द् र्)अः, रा (ष् ट् र्) अम् इत्यादौ दकारटकाररेफाणामपि द्वित्वं विकल्पेन प्राप्नोति।

तस्मात् अच इति नानुवर्तते चेत् त्रिप्रभृतिषु यरो द्वित्वं यत् प्राप्तं तत् न स्यात् - इति नपदमनुवर्त्य व्याख्येयम्। केन प्राप्तं द्वित्वं न। अनचि चेत्यनेन।

अथवा अच इत्यनुवर्तनीयम्। तदा - त्रिप्रभृतिषु हल्षु यः प्रथमः, अचः परः, तस्य द्वे वा स्यादिति सूत्रार्थः।

अच इत्यनुवर्तते चेत्, त्रिप्रभृतिषु सर्वेपि हल एव चेत्, विकल्पे वा निषेधविकल्पे वा फलभेदो नास्ति।

3. सूत्रार्थः – यरोऽनुनासिकेनुनासिको वा, अचो रहाभ्यां द्वे, नादिन्याक्रोशे पुत्रस्य - इति सूत्रेभ्यः (यरः अचः न) - इत्यनुवर्तते।

त्रिप्रभृतिषु अचः यरः द्वे न शाकटायनस्य -इति पदानि। शाकटायनस्येति कथनेन विकल्पः सिध्यति।

त्रिप्रभृतिषु वर्णेषु इति निर्धारणसप्तम्यन्तम्। तथाच - त्रिप्रभृतिसंयुक्तवर्णमध्ये यः अचः परो यर् तस्य द्वे न स्तः, शाकटायनमते -इति सूत्रार्थः। त्रयः ततोऽधिका वा वर्णा यत्र संयुक्ता भवन्ति तत्र अनचि च इत्यनेन प्राप्तं (अच् यर् हल् हल् इत्येवं स्थिते यरः) द्वित्वं विकल्पेन निषिध्यते। यथा - इ न् द् र् अः। नकारदकाररेफाः त्रयः संयुक्ताः। अचः परो यर् नकारः। अनचि च इत्यनेन द्वित्वविकल्पे 1. इ न्न् द् रः, 2. इ न् द् रः।

सर्वत्र शाकल्यस्य इत्यनेन द्वित्वनिषेधे - इ न् द् रः।



epathshala पाठशाला A Gateway to all Post Graduate Courses

त्रिप्रभृतिवर्णसमुदायस्य य आदिवर्णः तस्य द्वित्वं शाकटायनेनापि निषिध्यते - इ न् द् र् अः।

एवञ्च अनचि च इति विकल्पेनैव रूपद्वयं सिध्यति।

1) त्रिप्रभृतिषु शाकटायनस्य

2) सर्वत्र शाकल्यस्य

3) दीर्घादाचार्याणाम्

इति सूत्रत्रयं शाकल्यशाकटायनयोराचार्ययोः अन्येषामाचार्याणाञ्च मतभेदज्ञानार्थमेव।

अचो रहाभ्यां द्वे, अनचि च - इति सूत्रद्वये यरोऽनुनासिकेऽनुनासिको वा इत्यतः वापदं नानुवर्तते इति स्वीकारे तु विकल्पार्थं सर्वत्र शाकल्यस्येत्यावश्यकम्। अन्यत् सूत्रद्वयं मतभेदज्ञानार्थम्।

**2.0 अदर्शनं लोपः**

**2.1 सूत्रोल्लेखसङ्गतिः**

इको यणचीति सूत्रं व्याख्यातम्। सुध्युपास्य इति तदुदाहरणे प्रक्रिया दर्शनीया। तथाहि - सुधीभिः उपास्यः इति विग्रहानुरोधेन समासे कृते सुधी भिस् उपास्य सु इति स्थिते सुपो धातुप्रातिपदिकयोरिति सूत्रेण भिसः सुपश्च लोपे सुधी उपास्य इत्यवस्थायाम् इको यणचीति सूत्रेण यणादेशः। तत्रैवं प्रक्रिया-

क) सुध् (ई + उ) पास्यः।

ख) सुध् य् +उपास्यः - इको यणचि इति यणादेशः।

ग) सु ध् ध् य् +उपास्यः - अनचि च इति द्वित्वम्।

घ) सु द् ध् य् +उपास्यः - झलां जश् झशि। ङ) सु द् ध् य् + उपास्यः।

अत्र सुद् ध् य् इति पदं भवति। दकारधकारयकाराणां समुदायस्य संयोगसंज्ञा विद्यते। तथा च सुद्ध्य् इति संयोगान्तं पदम्। तत्र संयोगान्तस्य च इति सूत्रेण अन्त्यस्य यकारस्य लोपः प्राप्नोति। तत्र संशयः - को नाम लोपः इति। अतः लोपसंज्ञाविधायकं सूत्रमुपन्यस्यति- अदर्शनं लोप इति।

### 2.2 सूत्रार्थः

स्थानेन्तरतम इति सूत्रात् स्थाने इत्यनुवर्तते। स्थानशब्दस्य प्रसङ्ग इत्यर्थः। स्थाने - प्रसङ्गे सति। कस्य प्रसङ्गे सति? शब्दस्य (शब्दशास्त्रप्रस्तावात्) अदर्शनं नाम दर्शनाभावः। दर्शनमित्यस्य चक्षुरिन्द्रियजन्यं ज्ञानमिति विशिष्टार्थो न विवक्षितः। किन्तु सामान्येन ज्ञानमित्येवार्थो विवक्षितः। शब्दज्ञानं प्रति शब्दश्रवणं सामग्री। श्रवणं प्रति उच्चारणं सामग्री। एवञ्च सामग्रीकृता या शब्दस्य सत्ता तदभाव एवात्र अदर्शनशब्देन विवक्षितः। मनसि ज्ञानस्य सत्तायामपि उच्चारणकृतायाः सत्ताया अभावः।

एवञ्च - शब्दस्य उच्चारणप्रसङ्गे सति तदनुच्चारणकृतं यद् अदर्शनं तस्य लोप इति संज्ञा। कौमुद्यां सूत्रवृत्तिः - प्रसक्तस्यादर्शनं लोपसंज्ञं स्यादिति सूत्रार्थः।

### 2.3 सूत्रार्थे प्रसक्तस्येति पदमधिकृत्य विचारः

शब्दस्य प्रसङ्गो द्विधा - 1. शास्त्रतः, 2. अर्थतः

शास्त्रतो यथा - वारि राजा इत्यादौ सुप्रत्ययस्य स्वौजसित्यादिना सूत्रेण प्रसङ्गः। केवलस्य प्रातिपदिकस्य प्रयोगो नेष्यते। तथा च ङ्याप्प्रातिपदिकाद् इत्यधिकृत्य स्वौजसमौट्..इति सूत्रेण प्रथमैकवचने सुप्रत्ययोच्चारणं प्रसक्तम्। अर्थतो यथा - प्रासादमारुह्य प्रेक्षते इति प्रयोगप्रसङ्गे प्रासादात् प्रेक्षते इति ल्यबन्तस्यानुच्चारणम्।

**प्रश्नः** - शास्त्रतः अर्थतश्च प्रसक्तस्य प्रत्ययस्य विधानं कृत्वा तदनु तस्य लोपः किमर्थं विधीयते?

**उत्तरम्** - प्रत्ययलक्षणार्थम्। वस्तुतः प्रत्ययो नैवोत्पद्यते तादृशस्थले। प्रत्ययानुत्पत्तावपि साधुत्वमस्त्येवेति प्रत्ययलक्षणद्वारा बोध्यते।

**ग्रामे तिष्ठतीति प्रत्युदाहरणस्य खण्डनम्**

प्रसक्तस्यादर्शनं लोपसंज्ञं स्यादिति सूत्रवृत्तौ प्रसक्तस्येति पदस्य सार्थक्यं कैश्चिद् - "प्रसक्तस्येति किम्? ग्रामे तिष्ठतीत्यादौ ल्यब्लोपे पञ्चम्यापत्तिः, अस्ति चात्र ल्यपोदर्शनम्, शास्त्रतोऽर्थतश्च न तत्प्रसक्तिरिति न दोषः" - इति दर्शितम्। एतदयुक्तम्। कुतः?

ल्यब्लोपे कर्मण्यधिकरणे च इति वार्तिकस्य - ल्यबन्तोपस्थाप्यक्रियानिरूपितं यत् कर्मकारकमधिकरणकारकं वा तत्र पञ्चमी स्यात् ल्यबन्ताप्रयोगे इत्यर्थः। ग्रामे तिष्ठतीत्यत्र यदि ग्रामाधिकरणिका स्थितिक्रियेत्यर्थो विवक्षितः तर्हि शास्त्रतोऽर्थतश्च न ल्यबन्तप्रयोगप्रसक्तिः। यदि तु ल्यबन्तार्थक्रियानिरूपितकर्मत्वं ल्यबन्तार्थक्रिया-निरूपिताधिकरणत्वं वा विक्षितं तर्हि ग्रामात् तिष्ठतीत्येवं प्रयोग इष्ट एव।

**प्रसक्तस्येति दलस्य युक्तं प्रत्युदाहरणम्** - त्रपु। प्रसक्तस्येति पदस्याभावे अप्रसक्तस्यापि अदर्शनं लोपपदवाच्यं स्यात्। तथाच त्रपुपदोत्तरं क्विपः अदर्शनमस्तीति वक्तुं शक्यते। क्विपो लोपः। तदानीं प्रत्ययलोपे प्रत्ययलक्षणमिति न्यायेन तुगागमः प्राप्नोति। प्रसक्तस्येति पदसत्वे तु त्रपुशब्दस्य धातुत्वाभावात् क्विप् अप्रसक्त इति न दोषः।

**2.4 अर्थस्य वा शब्दस्य वा लोप इति संज्ञा**

**अर्थस्येयं संज्ञा व्याख्यानात् -**

**आक्षेपः -** ननु स्वं रूपं शब्दस्याशब्दसंज्ञा इति सूत्रं विद्यते। इह शब्दशास्त्रे उच्चारितः शब्दः स्वाकीयाम् आनुपूर्वीमुपस्थापयति, गुणवृद्ध्यादयः शब्दशास्त्रीयसंज्ञाशब्दास्तु न तथा - इति तदाशयः। एवञ्च - अदर्शनशब्दोपि अदर्शनमित्यानुपूर्वीमेव बोधयेत्। सूत्रे प्रयुक्तः अदर्शनशब्दः किम् अ-द-र्-श-न-म् इत्यानुपूर्वीं बोधयति वा उत दर्शनाभावरूपमर्थम् - इति प्रश्नाशयः। समाधानम् - न वेति विभाषा इत्यतः इतिशब्दोनुवर्तते- अदर्शनमिति लोपः। लोके इतिशब्दसमभिव्याहारेण शब्दः शब्दपरः सञ्जायते। इह शास्त्रे तु इतिशब्दसमभिव्याहाराभावेपि शब्दः शब्दपर एवेति स्वं रूपं शब्दस्येति सूत्रेण प्रतिपादितम्। तस्मात् इतिशब्दयोगेन शास्त्रे शब्दः अर्थपरो जायते। तथाच अदर्शनशब्दस्य लोपसंज्ञा न भविष्यति, किन्तु अदर्शनस्यैव।।

**3.0 हलो यमां यमि लोपः**

**उपोद्घातः**

**अत्र कौमुदीग्रन्थः -** हलः परस्य यमो लोपः स्याद् वा यमि। इति लोपपक्षे द्वित्वाभावपक्षे च एकयं रूपं तुल्यम्। लोपारम्भफलं तु आदित्यो देवता अस्येत्यादित्यं हविरित्यादौ। यमां यमीति यथासंख्यविज्ञानान्नेह - माहात्म्यम् - इति।

**अष्टाध्यायी -** अष्टमाध्याये चतुर्थपादे सूत्रमिदम्। 1. हलो यमां यमि लोपः, 2. झरो झरि सवर्णे - इति सूत्रक्रमः। झयो होऽन्यतरस्याम् इत्यतः अन्यतरस्याम् इत्यनुवर्तते।

**उदाहरणम् -**

सुधी उपास्यः - इको यणचि, सुध् य् उपास्यः - अनचि च, सु ध् ध् य् उपास्यः - झलां जश् झशि, सुद् ध् य् उपास्यः - यणो मयो द्वे वाच्ये, सुद् ध् य्य् उपास्यः - इत्यवस्थायां धकारयकारयोः मध्ये विद्यमानस्य यकारस्य विकल्पेन लोपः - हलो यमां यमि लोपः इति।

मधु अरिः - मध् व् अरिः - मद् ध् व् व् अरिः। अत्र धकारवकारयोः मध्ये स्थितस्य वकारस्य वा लोपः- हलो यमां यमि लोपः इति।

हरि अनुभवः - हर् य् अनुभवः - अचो रहाभ्यां द्वे, ह र् य् य् अनुभवः। अत्र रेफयकारयोः मध्ये स्थितस्य यकारस्य वा लोपः - हलो यमां यमि लोपः इति।

**अष्टाध्यायीक्रमे भेदः**

1) झयो होऽन्यतरस्याम्
2) शश्छोऽटि
3) झलां जश् झशि
4) अभ्यासे चर्च
5) खरि च
6) वावसाने
7) अणोऽप्रगृह्यस्यानुनासिकः
8) हलो यमां यमि लोपः
9) झरो झरि सवर्णे

इति भाष्यसम्मते सूत्रक्रमे वावसाने इत्यतः वापदमनुवर्तते। अन्यथा झयो होऽन्यतरस्यामित्यतः अन्यतरस्यामिति।

Pathshala
पाठशाला
A Gateway to all Post Graduate Courses

3) झलां जश् झशि

4) अभ्यासे चर्च

5) खरि च

6) वावसाने

7) अणोऽप्रगृह्यस्यानुनासिकः

1) झयो होऽन्यतरस्याम्

2) शश्छोऽटि

8) हलो यमां यमि लोपः

9) झरो झरि सवर्णे

इति सूत्रक्रमे तु झयो होऽन्यतरस्यामित्यतः अन्यतरस्यामिति अनुवर्तते। उभयथापि विकल्पेनैव लोपः।

**लोपपक्षे द्वित्वाभावपक्षे च एकयं रूपमिति -**

1) हर् य्य् अनुभवः

2) हर् य् अनुभवः

इति रूपद्वयम् अचो रहाभ्यां द्वे इति सूत्रानुरोधेन। तत्र हर् य्य् अनुभव इति द्वित्वविशिष्टे रूपे पूर्वयकारस्य विकल्पेन लोपे

1) हर् य्य् अनुभवः

2) 2.हर् य् अनुभवः

एवञ्च द्वित्वाभावपक्षे यथा एकयं रूपं, तथा लोपपक्षेपि एकयं रूपं सिध्यति। आहृत्य रूपद्वयमेव फलति।

**लोपारम्भफलम् -**

हर्यनुभव इत्यत्र लोपविकल्पं विनापि द्वित्वस्य वैकल्पिकत्वेनैव रूपद्वयं यदि सिध्यति तर्हि लोपविकल्पनं किमर्थमिति प्रश्नः।

अदितौ जात इत्यर्थे अदितिशब्दात् दित्यदित्यादित्यपत्युत्तरपदात् ण्यः इति सूत्रेण ण्यप्रत्यये - अदिति + ण्य आदिवृद्धौ, यस्येति च इति इकारलोपे च - आदित्य इति सिध्यति। ततः पुनः - सास्य देवता -इत्यर्थे तेनैव सूत्रेण ण्यः। आदित्य ण्य। आदित् य् अ य् अ।

यस्येति च इति अकारलोपे यकारद्वये पूर्वस्य अनेन वैकल्पिको लोपः। तथाच आदित्य्यः आदित्यः इति रूपद्वयसिद्धिः। अत्र एकयं रूपमनेनैव सिध्यति।

**पदकृत्यविचारः**

हल्यमोः मध्ये विद्यमानस्य तादृशस्यैव यमः लोपोनेन विधीयते। शय्या इत्यादौ श् (अ य् य्) आ हलः परत्वाभावात् यकारलोपो नास्ति। आर्ध्नोत् इत्यादौ आ (र् ध् न्) ओत् धकारस्य लोपो नास्ति, यम्प्रत्याहारे तस्याभावात्। रामाभ्याम् इत्यादौ रामा (भ् य् आ) म् यकारलोपो नास्ति यमि परे विहितत्वात्।

**प्रश्नः** - माहात्म्यम् इत्यत्र हलो यमां यमि लोप इति सूत्रेण मकारलोपः कथं न भवति?

**उत्तरम्** - माहा (त् म् य् )अम् इत्यत्र यद्यपि मकारो हलः परः यमि परे विद्यते तथापि सूत्रं न प्रवर्तते। कुतः। यमां यमि इत्यत्र निमित्तकार्यिणोः संख्यासमत्वात् यथासंख्यमेव आदेशो भवति। तथाच –

(यकारस्य यकारे परे) (वकारस्य वकारे परे) (रेफस्य रेफे परे)

(लकारस्य लकारे परे) (ञकारस्य ञकारे परे) (मकारस्य मकारे परे)

(ङकारस्य ङकारे परे) (णकारस्य णकारे परे) (नकारस्य नकारे परे) लोपः।

ePathshala पाठशाला A Gateway to all Post Graduate Courses

## 4.0 तस्य लोपः

**उपोद्घातः**

कौमुद्याम् एचोऽयवायाव इति सूत्रव्याख्यानानन्तरम् अय् अव् आय् आव् इत्येतेषामादेशानां यकारवकारयोः हलन्त्यमिति सूत्रेण इत्संज्ञामाशङ्क्य तस्य लोप इति सूत्रमुपन्यस्तम्।

**तस्य लोप** इति सूत्रस्य स्थाने **लोपः** इत्येवास्तु , को दोषः -इति विचारितं शेखरे।

**सूत्रे तस्यपदसार्थक्यम् -**

1) उपदेशेऽजनुनासिक इत्
2) हलन्त्यम्
3) न विभक्तौ तुस्माः
4) आदिर्ञिटुडवः
5) षः प्रत्ययस्य
6) चुटू
7) लशक्वतद्धिते

इति सप्तभिः सूत्रैः इत्संज्ञां विधाय तस्य लोपः -इति सूत्रेण इत्संज्ञकस्य लोपमिच्छति। तत्र प्रथमसूत्रात् इत् इति प्रतिसूत्रमनुवर्तते। लोपविधायके इत्पदं षष्ठ्यन्ततया विपरिणतमनुवर्तते। तथा च लोपः इत्येव सूत्रमस्तु। किमर्थं तस्यपदम्।

**उत्तरम् -** यदि तस्यपदं न स्यात् तर्हि पूर्वसूत्रात् इत्पदमनुवर्तते। इतो लोपः स्यादित्यर्थः। अलोऽन्त्यस्य इति परिभाषया लोपः अन्तादेशः प्राप्नोति। तथाच ञि टु डु - इत्येषाम् अन्त्यमात्रस्य लोपापत्तिः। इद्ग्रहणानुवृत्त्या सिद्धे तस्यपदग्रहणसामर्थ्यात्तु इतः सर्वस्य लोपः सिध्यति।

**अत्र प्रश्नः** – नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे इति परिभाषास्ति। अनर्थके अलोन्त्यस्येति परिभाषा न प्रवर्तते, अभ्यासविकारेषु तु अनर्थकविषयेपि प्रवर्तते। इत्संज्ञकानामनर्थकत्वात् तत्र अलोऽन्त्यस्येति परिभाषा न प्रवर्तते। तथाच सर्वलोप एव भवति। तदर्थं तस्यग्रहणमनावश्यकम् -इति।

**उत्तरम्** – नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे इति परिभाषा पाणिनिव्याकरणे अनावश्यकी इति भाष्यकृता सिद्धान्तितम्।

एचोऽयवायाव इत्यत्र यकारवकारयोः हलन्त्यमिति सूत्रेण इत्संज्ञा कुतो न भवति - इति प्रश्नः।

**उत्तरम्** - न केवलं हलन्त्यमित्यादिसूत्रेण इत्संज्ञा भवति। इत्संज्ञा भवेत्, यदि प्रयोजनं स्यात्। प्रकृते यकारवकारयोः इत्संज्ञायां किमपि फलं नास्ति। अत इत्संज्ञा न।

e-pathshala पाठशाला A Gateway to all Post Graduate Courses